# bAShkalamantropaniShat with commentary

# બાષ્કલમન્ત્રોપનિષત્ સવૃત્તિકા

## Document Information

Text title : bAShkalpaniShat with Commentary

File name : bAShkalpaniShat.itx

Category : upanishhat, vedanta, upanishad

Location : doc_upanishhat

Proofread by : Sunder Hattangadi

Description-comments : aprakAshitA upaniShadaH

Latest update : October 7, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2021

*sanskritdocuments.org*

# બાષ્કલમન્ત્રોપનિષત્ સવૃત્તિકા

અથ બાષ્કલમન્ત્રોપનિષત્ ।
મેધાતિથિં કાણ્વમિન્દ્રો જહાર ધા મેષભૂયોપગતો વિદાનઃ ।
તમન્ય ઇત્તમનં પરિપ્રાટ્ પદ એનં નિયુયુજે પરસ્મિન્ ॥ ૧॥

કો હ સ્મૈષ ભવસિ વ્યવાયો નાવાયો મ ઇહ શશ્વદસ્તિ ।
સુશેવમિચ્ચ્યઙ્ક્રમસિ પ્રપશ્યન્નિત્થા ન કશ્ચોરણમાચચક્ષે ॥ ૨॥

નેમામસ્પૃક્ષદિદુદસ્યમાનઃ કો અદ્ધામૂમભિચઙ્ક્રમીતિ ।
તદિચ્છાધિ યો અસિ સર્વવિત્તમો ન ત્વાશ્નવદ્બ્રહ્મ રિષા મયસ્વિ ॥

ઇન્દ્રો નૃચક્ષા વૃષભસ્તુરાષાટ્ પ્રસાસહિસ્તપસા મા વિચક્ષે ।
સ ઇદ્દેવો ઋતમન્વયન્તં પ્રભીમકર્મા તવસોઽપવિદ્ધાત્ ॥ ૪॥

કુહેવ માવશમિતો નયાતૈ કુહેવ તે ચિત્રતમપ્રતિષ્ઠા ।
કુહાચિદેષ સ્વપિતા પિતા નો યો ન વેદ ન હૃતં હરન્તમ્ ॥ ૫॥

પ્રત્યઙ્ઙવાઙ્પ્રાઙિતરૌ ચ નેહ નાહમેનાનનુપતસ્થિરદ્ધા ।
ન મામિમે નૂનમિત્થા પથો વિદુર્યે મા ન યન્તિ મિથુ ચાકશાનાઃ ॥ ૬॥

પરઃ સ્મિયાનો અવિવરસ્ય શૂકં કિં સીમિચ્છરણં મન્યમાનઃ ।
ન હ ત્વાહમપ્રણીય સ્વવિષ્ઠામિત્થા જહામિ શપમાનમિન્નુ ॥ ૭॥

અહમસ્મિ જરિતૃણામુ દાવા અહમાશિરમહમિદં દધગ્વાન્ ।
અહં વિશ્વા ભુવના વિચક્ષન્નહં દેવાનામાસન્નવોઽદઃ ॥ ૮॥

મમ પ્રતિષ્ઠા ભુવ આણ્ડકોશા વિ ચૈમિ સં ચ હિ નુ યો વિરશ્પી ।
અહં ન્વહિં પર્વતે શિશ્રિયાણમુગ્રો ન્વહં તવસાવસ્યુરદ્ધા ॥ ૯॥

પ્રવક્ષ્ણા અભિદં પર્વતાનાં યત્સીમિન્દ્રા અકરોદનીકૈઃ।
કો અદ્ધા વેદ ક ઇહ પ્રવોચત્ કો અશ્નવદભિમાતિં વિજઘ્નુષઃ ॥ ૧૦॥

કો મે અવો દાશુષો વિષ્વગૂતીરિત્થા દદશ્રે ભુવનાધિ વિશ્વા ।

રૂપં રૂપં જનુષા બોભવીમિ માયાભિરેકો અભિચાકશાનઃ ॥ ૧૧॥

વિશ્વં વિચક્ષે યમયન્નભીકો નેશે મે કશ્ચ મહિમાનમન્યઃ ।
અહં દ્યાવાપૃથિવી આતતાનો બિભર્મિ ધર્મમવસે જનાનામ્ ॥ ૧૨॥

અહમુ હ પ્રવર્તિં યજ્ઞિયામિયાં
અહં વેદ ભુવનસ્ય નાભિમ્ ।
આપિઃ પિતા સૂરહમસ્ય વિષ્વઙ્
અહં દિવ્યા આન્તરિક્ષ્યાસ્તુકા વહમ્ ॥ ૧૩॥

અહં વેદાનામુત યજ્ઞાનામહં છન્દસામવિદં રયીણામ્ ।
અહં પચામિ સરસઃ પરસ્ય યદિદેતીવ સરિરસ્ય મધ્યે ॥ ૧૪॥

અહમિન્નુ પરમો જાતવેદા યમધ્વર્યુરભિલોકં પૃણૈધીત્ ।
યમન્વાહ નભસો ન પક્ષી કાષ્ઠા ભિન્દન્ ગોભિરિતોઽમુતશ્ચ ॥ ૧૫॥

અહમુ યન્નપતતા રથેન દ્વિષડારેણ પ્રધિનૈકચક્રઃ ।
અહમિન્નુ દિધ્યુતાનો દિવે દિવે તન્વં પુપુષ્યાનમૃતં વહામિ ॥ ૧૬॥

અહં દિશ પ્રદિશ આદિશશ્ચ વિષ્વક્ પુનાનઃ પર્યેમિ લોકમ્ ।
અહં વિશ્વા ઓષધીર્ગર્ભ આધાં યાભિરિદં ધિનુયુર્દાશુષઃ પ્રજાઃ ॥ ૧૭॥

અહ ચરામિ ભુવનસ્ય મધ્યે પુનરુચ્ચાવચં વ્યશ્નુવાનઃ ।
યો મા વેદ નિહિતં ગુહા ચિત્ સ ઇદિત્થા શેભવીદાશયધ્યૈ ॥ ૧૮॥

અહં પઞ્ચધા દશધા ચૈકધા ચ સહસ્રધા નૈકધા ચાસમત્ર ।
મયા તતમિતીદમશ્નુતે તદન્યથાસદ્યદિ મે અસદ્વિદુઃ ॥ ૧૯॥

ન મામશ્નોતિ જરિતા ન કશ્ચન ન મામશ્નોતિ પરિ ગોભિરાભિઃ ।
ન મેઽનાશ્વાનુત દાશ્વાનજગ્રભીત્ સર્વ ઇન્મામુપયન્તિ વિશ્વતઃ ॥ ૨૦॥

ક્વ શરારુઃ ક્વ સૃમરઃ ક્વ નૂરણઃ સર્વમિદં ત્વત્ત્વદિતો વહામિ ।
યન્મદિમે બિભ્યતિ તન્મ એકં તે મે અક્ષન્નહમુ તાનનુક્ષમ્ ॥ ૨૧॥

યત્તપ્યથા બહુધા મે પુરા ચિત્તન્નુ ભુવેઽહમુરણો બોભુવે ।
ઋતસ્ય પન્થામસિ હિ પ્રપન્નોઽયસે સ મે સત્યમિદેકમેહિ ॥ ૨૨॥

અહં જ્યોતિરહમૃતં વિનદ્ધિરહં જાતં જનિ જનિષ્યમાણમ્ ।
અહં ત્વમહમહં ત્વમિન્નુ ત્વમહં ચક્ષ્વ વિચિકિત્સીર્મ ઋજ્વા ॥ ૨૩॥

વિશ્વશાસ્તા વિધરણો વિશ્વરૂપો રુદ્રઃ પ્રણીતી તમનઃ પ્રજાપતિઃ ।

હંસો વિશોકો અજરઃ પુરાણ ઋતીયમાનો અહમસ્મિ નામ ॥ ૨૪॥

અહમસ્મિ જરિતા સર્વતોમુખઃ પર્યારણઃ પરમેષ્ઠી નૃચક્ષાઃ ।
અહં વિષ્વઙ્ઙહમસ્મિ પ્રસત્વાનહમેકોઽસ્મિ યદિદં નુ કિં ચ ॥ ૨૫॥

ઇતિ બાષ્કલમન્ત્રોપનિષત્ સમાપ્તા ।

અથ બાષ્કલમન્ત્રોપનિષત્ સવૃત્તિકા ।
મેધાતિથિં કાણ્વમિન્દ્રો જહાર ઇત્યાદ્યા બાષ્કલાનાં મન્ત્રોપનિષત્ ।
તસ્યાશ્ચેયમલ્પાક્ષરા વૃત્તિરારભ્યતે । મેધાતિથિનામાનમૃષિં
કણ્વસ્ય પુત્રં સામવેદબ્રાહ્મણપ્રસિદ્ધમિન્દ્રઃ જહાર । દ્યા
મેષભૂયોપગતો વિદાનઃ । મેષભૂયં મેષભાવમ્ । ભુવઃ ક્યપ્ ।
ઉપગતઃ પ્રાપ્તઃ । સામવેદબ્રાહ્મણપ્રસિદ્ધાખ્યાયિકઃ । દ્યાઃ સ્વર્ગલોકાન્
પ્રતીતિ વિવક્ષિતં જહાર હૃતવાન્ । વિદાનઃ જ્ઞાની ॥ તમન્ય
ઇત્તમનં પરિપ્રાટ્ । તં ઇન્દ્રં અન્યઃ મેધાતિથિઃ ઇદિતિ નિરર્થકો
નિપાતઃ । તમનં હરણેન ગ્લાનિપદમ્ । પરિપૃચ્છતીતિ પરિપ્રાટ્ ।
મેધાતિથિઃ પદ એનં નિયુયુજે પરસ્મિન્ ॥ ૧॥

પરસ્મિન્ પદે જ્ઞેયે તત્સ્વરૂપે પદાર્થે નિયુયુજે નિયુક્તવાન્ ।
વિલક્ષણમેષીભૂતેન્દ્રકર્તૃકવિલક્ષણક્રિયાદર્શનાત્
આપાતતો વિલક્ષણઃ પરો દેવઃ કશ્ચિન્ન તુ મે મેષ ઇતિ
તાત્ત્વિકતત્સ્વરૂપજ્ઞાનાય વક્ષ્યમાણપ્રશ્નેન પરં પદં જ્ઞેયં
સ્વસ્વરૂપં કથયેતિ પ્રશ્નેન નિયોજિતવાનિત્યર્થઃ । પ્રશ્નમેવાહ
શ્રુતિઃ । કો હ સ્મૈષ ભવસિ વ્યવાયઃ । હ ઇતિ પૂર્વવૃત્તાવદ્યોતકો
નિપાતઃ । સ્મેતિ નિરર્થકમ્ । એષ પ્રત્યક્ષઃ । વ્યવાયો જ્ઞેયઃ ।
વ્યવપૂર્વસ્યૈતેર્ઘઞિ રૂપમ્ । કશ્ચિત્ જ્ઞાતું યોગ્યસ્ત્વમસિ ।
નાવાયો મ ઇહ શશ્વદસ્તિ । મે મમ શશ્વદિતિ ધ્રુવાર્થં આવાયો જ્ઞાનં
નાસ્તિ કસ્ત્વમિતિ । દૃશ્યમાને મેષસ્વરૂપે કથમેવં સંશય ઇતિ
ચેત્ । તત્રાહ । સુશેવમિચ્ચઙ્ક્રમસિ । શોભનમેવ ચઙ્ક્રમણં
કરોષિ । પ્રપશ્યન્ ઇત્થા ન કશ્ચોરણમાચચક્ષે ॥ ૨॥

ઇત્થા ન । હરથમિવ । નકાર ઇવાર્થઃ । કો વા ઇત્થં ક્રમમાણં
પ્રપશ્યન્ ઉરણં મેષં આચચક્ષે । ઉક્તવાન્ । દૃષ્ટવાન્ વા । ઇત્થં
ક્રમમાણ ઉરણો ન કેનચિદૃષ્ટ ઇતિ ભાવઃ ક્રમેણ વૈલક્ષણ્યમેવાહ ।
નેમામસ્પૃક્ષદિદુદસ્યમાનઃ । ઇમાં પૃથિવીં ઉદસ્યમાનઃ । ઇત્ એવાર્થે ।

કૂર્દન્નેવ ન અસ્પૃક્ષત્ ન સ્પૃશતીતિ લકારવ્યત્યયઃ । નૈતાવતા
વૈલક્ષણ્યમત આહ । કો અદ્ધામૂમભિચઙ્ક્રમીતિ । અદ્ધા સાક્ષાત્ ।
અનેનૈવ શરીરેણ । અમૂં ધામ્ । કઃ અભિચઙ્ક્રમીતિ અભિક્રામતિ ।
પ્રશ્નમુપસંહરતિ । તદિચ્છાધિ યો અસિ સર્વવિત્તમઃ । તત્ તસ્માત્
શાધિ । ઇદિત્યનર્થકમ્ । શિક્ષય યસ્ત્વં સર્વવિત્તમઃ સર્વજ્ઞતમઃ
અસિ તત્સ્વરૂપં કથયેતિ ભાવ । અકયનેઽનિષ્ટ સભાવ્યતે । તન્મા
ભવત્વિત્યાહ । ન ત્વાશ્નવદ્બ્રહ્મ રિષા મયસ્વિ ॥ ૩॥

મયસ્વિ તેજસ્વિ બ્રહ્મ બ્રાહ્મણ્ય રિષા ક્રોધન ત્વા ત્વા ન અશ્નવત્ ન
અશ્નોતિ ન વ્યાપ્નોત્ । અસ્મદીયક્રોધવ્યાપાગવિપયા મા ભૂદિત્યભિપ્રાયઃ ।
કુતસ્તવૈવ બલમત આહ । ઇન્દ્રો નૃચક્ષા વૃષભસ્તુરાપાટ્ ।
ઇન્દ્ર પરમેશ્વર નૃચક્ષા સર્વજગત્કર્મસાક્ષી વૃષભ
કામપ્રદસ્તુરપાટ્ તુર પરબલ સહત અભિભવતીતિ સહે છન્દસીતિ
ણ્વિ । પ્રસાસહિસ્તપસા મા વિચક્ષે । પ્રસાસહિ પ્રસહનશીલ । તપસા
ઉપલક્ષણે તૃતીયા । મા મા વિચક્ષ પશ્યતિ । અત સત્યમકથયત
ઈશ્વરાદ્ભયમપ્યાહ । સ ઇહેવો ઋતપ્રન્વયન્તમ્ । ઇત એવાર્થે । સ ઇત
સ એવ દેવ ઋત સત્ય અનુ લક્ષીકૃત્ય અયન્ત અગચ્છટ સત્યેન પથા
અગચ્છન્ત સત્યમબ્રુવાણમિતિ યાવત્ ।
પ્રભીમકર્મા તવસોઽપવિદ્ધાત્ ॥ ૪॥

અપવિદ્ધાત્ ક્ષિપ્તાત્ તવસો વક્ત્રાત પ્રભી પ્રકૃષ્ટ ભય
મા અક કાર્ષીત્ । પ્રષ્ટવ્યમાહ । કુહેવ માવશમિતો નયાતૈ ।
કુત્રેવ મા મા અવશા ઇત અસ્માત્ સ્થાનાત્ નયાત નાયસિ । કિં
ચ । કુહેવ તે ચિત્રતમપ્રતિષ્ઠા । સ્પષ્ટમ્ । ઈદૃક્લષ્ટે
કાયવાઙ્મનાનિર્નિષવિતમીશ્વર સ્મરતિ । કુહાચિદેષ સ્વપિતા પિતા નઃ ।
એષ માનસપ્રત્યક્ષા ન પિતા ઈશ્વર કુહાચિત્ કુત્ર સ્વપિતા સ્વપિતિ ।
યો ન વેદ ન હૃત હરન્તમ્ ॥ ૫॥

ય હૃત મા ન વેદ ન વા હરન્ત વદત્યન્વય । કિં ચ ઇતર
પ્યાતન્મનિષવિતા દેવા ન મત્સહાયા ઇત્યાહ । પ્રત્યઙ્ઙ્વાઙ્પ્રાઙ્તરા
ચ નેહ । પઞ્ચસુ દિક્ષુ તત્ર તત્ર વર્તમાના પ્રાણપઞ્ચકા-
ધિષ્ટાતારો દેવા લક્ષ્યન્ત । ઇતરા ચત્યન્તેષુ । સર્વત્ર સમમ્યર્થો
બોધ્ય । વર્તમાના ઇતિ ચ શેષ । તેઽત્ર દેવા અપિ કિં નેહ સન્તિ ।
પક્ષાન્તરમાહ । નાહમેનાનનુપસ્થિરદ્ધા । એના દેવાન્ । જદ્ધા સત્યેન ।

અહ નોપતસ્થિ નોપસ્થાતા ઇતિ ન । અપિ તુ ઉપસ્થાતવ । કિં ચ ।
ન મામિમે નૂનમિત્થા પથો વિદુઃ । નૂન નિશ્ચિતોઽયમર્થ । ઇમે દેવા
મા ઇત્થા ઇત્થભૂત ન વિદુ । યે મા ન યન્તિ મિથુ ચાકશાનાઃ ॥ ૬॥

યે પથો માર્ગાત્ મા મા ન નયન્તિ । કીદૃશ મિથુ મિથ ચાકશાના
ભાસમાના । અત પરમિન્દ્રમ્ય મેષવેષધારિણ પ્રતિવચનમુપક્રમતે ।
પરઃ સ્મિયાનો અવિવરસ્ય શૂકમ્ । પર ઇન્દ્ર સ્મિયાન હસન્ અસ્ય મેધાતિથે
શૂક શઙ્કા અવિવ વિવૃતવાન્ । કિં સીમિચ્છરણં મન્યમાનઃ । સીમિતિ
નિરર્થકો નિપાત । ઇત્ પ્રશ્ને । કિં શરણ રક્ષક મન્યમાન અસીતિ
શેષ । ઇત્થમ્ભૂતસ્ત્વં કિં શરણ મન્યસ ઇત્યર્થ । પુનરિન્દ્ર
આહ– ન હ ત્વાહમપ્રણીય સ્વવિષ્ઠામિત્થા જહામિ શપમાનમિન્નુ ॥ ૭॥

હેત્યૈતિહ્યાર્થ । ત્વા ત્વા સ્વવિષ્ઠા સ્વસ્થાન અપ્રણીય અપ્રાપય્ય ઇત્થા
ઇત્થભૂત અજ્ઞાનપઙ્કનિમગ્ન ન જહામિ શપમાનમિન્નુ શપમાનમપિ ।
તથા ચ ત્વામજ્ઞાનપઙ્કાદુદ્ધૃત્ય સ્વસ્થાનમાત્મસ્વરૂપ યાવન્ન
પ્રાપયામિ તાવન્ન ત્વા મુઞ્ચામીતિ ફલિતોઽર્થ । તદિચ્છાધિ યો અસિ
સર્વવિત્તમ ઇત્યસ્યોત્તરમાહ । અહમસ્મિ જરિતૄણામુ દાવા । અહ ઉ ઇતિ
નિશ્ચયે । જરિતૄણા યજમાનાના “જરિતા વૈ યજમાન” ઇતિ
શ્રુતે । દાવા દાતા ફલસ્યેતિ શેષ । અસ્મિ ભવામિ । યાગાદિફલ-
પ્રદોઽહમેવ । અહમાશિરમ્ । સોમસસ્કારક પય તદપ્યહમેવ ।
અહમિદં દધગ્વાન્ । ઇદ હવિ દધગ્વાન્ દાહક । એતસ્ય હવિષો
દાહકશ્ચાહમેવેત્યર્થ । કિં ચ । અહં વિશ્વા ભુવના વિચક્ષન્નહં
દેવાનામાસન્નવોઽદઃ ॥ ૮॥

વિશ્વા ભુવનાનિ વિશ્વેષા ભુવનાના વિચક્ષન્ સાક્ષી સન્નહ દેવાના
આસન્ આસ્યે અવ અન્નાદ્ય અદ દદામિ । કુહેવ તે ચિત્રતમપ્રતિષ્ઠા
ઇત્યસ્યોત્તરમાહ । મમ પ્રતિષ્ઠા ધ્રુવ આણ્ડકોશાઃ । ભુવ ઉત્પાદકસ્ય
મમ આણ્ડકોશા બ્રહ્માણ્ડાનિ પ્રતિષ્ઠા “તત્સૃષ્ટ્વા” ઇતિ શ્રુતે ।
વિ ચૈમિ સં ચ હિ નુ યો વિરપ્શી । યોઽહ વ્યેમિ વિયુક્તો ભવામિ
સમેમિ સઙ્ગતશ્ચ ભવામિ સસારેઽસ્મિન્ વિરપ્શી વિવિધ રપતિ શબ્દ
કરોતીતિ વિરપ્શી રપધાતો શિનિન્ । શબ્દવાન્ વેદપ્રવક્તેતિ યાવત્ ।
અહ ન્વહિ પર્વતે શિશ્રિયાણમ્ । નુ ઇતિ નિશ્ચયે । અહમેવ નાન્ય ।
અહિ વૃત્રાસુર પર્વતે શિશ્રિયાણ પર્વતાશ્રિત અહનમ્ । ઉગ્રો ન્વહં
તવસાવસ્યુરદ્ધા ॥ ૯॥

ઉગ્ર ક્રૂરકર્મા નુ નિશ્ચિત અહમેવ । તવસા વજ્રેણ અદ્ધા નિશ્ચિતમ્ ।
અવસ્યુ અન્નેચ્છ । ઐશ્વર્યેચ્છુરિતિ યાવત્ । સોઽપ્યહમેવ ।
પ્રવક્ષ્ણાનભિદં પર્વતાનામ્ । પ્રવક્ષ્ણાન્ પક્ષાન્ પર્વતાના અભિદ
ભેદિતવાનસ્મિ । યત્સીમિન્દ્રો અકરોદનીકૈઃ । યત્ પુરુષસાધ્ય કર્મેન્દ્ર
અનીકૈ અકરોત્તત્ અહમેવાકરવમિતિ વાક્યશષ । સીમિતિ નિરર્થકો નિપાત ।
કો અદ્ધા વેદ ક ઇહ પ્રવોચત્ । અદ્ધા સત્ય મમ સ્વરૂપમિતિ શેષ ।
કો વેદ ક વેત્તા । કો વા પ્રવક્તા ।
કો અશ્નવદભિમાતિં વિજઘ્નુષ ॥ ૧૦॥

કિં ચ અભિમાતિ અરિસૈન્ય વિજઘ્નુષ હતવતો મમ મામિત્યર્થ । ક
અશ્નવત્ ક અશ્નોત્ । મયિ વ્યાપકતા કર્તું ન કોઽપિ સમર્થ ઇત્યર્થ ।
કો મે અવો દાશુષો વિષ્વગૂતીરિત્થા દદશ્રે ભુવનાધિ વિશ્વા । અવોઽન્ન
દાશુષો દત્તવત મે ઊતી શક્તી વિશ્વા ભુવનાન્યધિ । અધિરીશ્વર ઇતિ
કર્મપ્રવચનીયતા । સર્વેષુ ભુવનેષુ ક દદશ્રે ક દદર્શ । કિં
ચ । રૂપંરૂપં જનુષા બોભવીમિ । જનુષા શરીરગ્રહણમત રૂપરૂપ
અનેકરૂપ બોભવીમિ ભવામિ શુદ્ધસ્ય તવ કથ શરીરગ્રહણમત આહ ।
માયાભિરેકો અભિચાકશાનઃ ॥ ૧૧॥

અનેકાભિર્વિચિત્રશક્તિમિર્માયાભિ એકોઽપિ અભિત ચાકશાન ભાસમાન
માયાપ્રતિબિમ્બિત ઇતિ યાવત્ । કિં ચ । વિશ્વં વિચક્ષે યમયન્નભીક ।
અભીકો નિર્ભય વિશ્વ યમયન્ । અન્તર્યામિસ્વરૂપેણ અધિતિષ્ઠન્ ।
વિચક્ષે પશ્યામિ । કિં ચ । નેશે મે કશ્ચ મહિમાનમન્યઃ । મહિમાન
પ્રાપ્તુમિતિ શેષ । સ્પષ્ટમ્ । કિં ચ । અહં દ્યાવાપૃથિવી આતતાનો
બિભર્મિ ધર્મમવસે જનાનામ્ ॥ ૧૨॥

દ્યાવાપૃથિવી આતતાનસ્તન્વન્નહ જનાના અવસે જનાના અવિતુ
ધર્મં મહાવીરં યજ્ઞશિરો બિભર્મિ । ઇદમુપલક્ષણમ્ ।
કર્મમાર્ગપ્રવર્તનેનાપિ લોકરક્ષક ઇતિ ફલિતોઽર્થ ।
“આહુત્યાપ્યાયતે સોમ” ઇત્યાદિસ્મૃતે । અહમુ હ પ્રવતિં
યજ્ઞિયામિયામ્ । અહ ઉ હ યજ્ઞિયા પ્રવતિ યજ્ઞસબન્ધિન કામમહમિયામ્ ।
કર્મફલપ્રદોઽપ્યહમેવેતિ ભાવ । અહં વેદ ભુવનસ્ય નાભિમ્ ।
ત્રૈલોક્યવર્તિપદાર્થમાત્ર નાભિપદેનોપલક્ષ્યતે । આપિઃ પિતા
સૂરહમસ્ય વિષ્વઙ્ । આપિ પિતામહ પિતા જનક સૂર્માતા અહમેવ અસ્ય

વિશ્વસ્ય । કિં ચ । અહં દિવ્યા આન્તરિક્ષ્યાસ્તુકા વહમ્ ॥ ૧૩॥

દિવ્યા આન્તરિક્ષ્યાશ્ચ તુકા બિન્દૂન્ અહ વહ વહામિ । લકારવ્યત્યય અડાગમાભાવશ્ચ છાન્દસ । વૃષ્ટિકર્તાપ્યહમેવેત્યર્થ । અહં વેદાનામુત યજ્ઞાનામહં છન્દસામવિદં રયીણામ્ । સર્વત્ર કર્મણિ ષષ્ઠી અવિદ વેદ્મિ । અહં પચામિ સરસઃ પરસ્ય યદિદેતીવ સરિરસ્ય ગવ્યે ॥ ૧૪॥

પરસ્ય સરસ સમુદ્રસ્ય મધ્યે યત્ ઇત્ ઉદર્થે । ઉદેતીવ । ઉદય બડબાનલસ્વરૂપેણ ઉદય પ્રાપ્નોતીતિ યાવત્ । તત્ બડબાનલસ્વરૂપ તેજ અહમેવ સન્ સરિરસ્ય સલિલસ્ય કર્મણિ ષષ્ઠી સલિલમહમેવ પચામિ । અહમિન્નુ પરમો જાતવેદા યમધ્વર્યુરભિલોકમ્પૃણૈધીત્ । અહમિન્નુ પરમ પવિત્રતમો જાતવેદા અગ્નિ ય જાતવેદસ અધ્વર્યુ અભિલોકં પૃણા લોકપૃણામિષ્ટકામભિ લક્ષીકૃત્ય અધ્વર્યુ ઐધીત્ સમિદ્ધ ચકાર । યમન્વાહ નભસો ન પક્ષી કાષ્ઠા ભિન્દન્ ગોભિરિતોઽઋતોમુતશ્ચ ॥ ૧૫॥

યમધ્વર્યુમનુ લક્ષ્યીકૃત્ય નભસો ન પક્ષી નભસ પક્ષીવ નકાર ઇવાર્થે ગોભિર્વાગ્ભિ । ઇત અમુતશ્ચ કાષ્ઠા દિશ ભિન્દન્ અન્વાહ શસતિ । હોતેતિ શેષ । અહમુ યન્નપતતા રથેન દ્વિષડારેણ પ્રધિનૈકચક્રઃ । અહ ઉ । દ્વિષડારેણ દ્વાદશારેણ દ્વાદશમાસાત્મકેન સંવત્સરરૂપેણ અન્તરિક્ષેઽપિ અપતતા રથેન પ્રધિના ચક્રધારયા ઉપલક્ષિતેન યન્ ગચ્છન્ ય સોઽહમેવેત્યન્વય । કીદૃશોઽહ એકચક્ર । ન ખલ્વન્યોઽહમિવ એકેન ચક્રેણ યાતિ । એવ સૂર્યરૂપેણ પ્રસ્તૂય ચન્દ્રરૂપેણ સ્તૌતિ । અહમિન્નુ દિદ્યુતાનો દિવેદિવે તન્વં પુપુષ્યાનમૃતં વહામિ ॥ ૧૬॥

અહમવ નિવેદિવે પ્રતિતિન તન્વ શરીર પુપુણ્યાન્ પોપયન્ અમૃત વહામિ પ્રાપયામિ પ્રજાભ્ય ઇતિ શપ । કીદૃશ દિદ્યુતાન પ્રકાશમાન । અથ વાયુરૂપેણ સ્તૌતિ । અહં દિશઃ પ્રદિશ આદિશશ્ચ વિષ્વક્ પુનાનઃ પર્યેમિ લોકમ્ । સ્પષ્ટમ્ । અથ પૃથિવીરૂપેણ સ્તૌતિ । અહં વિશ્વા ઓષધીર્ગર્ભ આધાં યાભિરિદં ધિનુયુર્વાશુપઃ પ્રજાઃ ॥ ૧૭॥

વિશ્વા સર્વા ઓષધી અન્નાનિ । આધા દધ । દાશુપ યજમાનસ્ય પ્રજા યાભિરોષધીભિ ઇદ વિશ્વ ધિનુયુ પ્રીણયન્તિ । અથ સકલજીવરૂપતામાહ । અહં ચરામિ ભુવનસ્ય મધ્યે

પુનરુચ્ચાવચં વ્યશ્નુવાનઃ । ઉચ્ચાવચ ઊર્ધ્વમધશ્ચ ।
આબ્રહ્મસ્તમ્બપર્યન્તજીવરૂપોઽહમેવેતિ ભાવ । યો મા વેદ નિહિત ગુહા
ચિત્સ ઇદિત્થા બોભબીદાશયયૈ ॥ ૧૮॥

યો મા મા ગુહા ગુહાયામન્તઃકરણ નિહિત
હૃત્કમલાન્તર્વર્તિનમેતદુક્તરૂપાભેદેન વેદ ઉપાસ્ત સ ઇત્થા ઇત્થ
આશય યૈ આશયિતુ આશય કર્તુ બોભવીતિ ભવતિ । ઇત્થમશયા
બ્રહ્મજ્ઞાની મત્તુયો ભવતીતિ યાવત્ । ચિદિતિ નિરર્થકમ્ । અહં
પઞ્ચધા દશધા ચૈકધા ચ સહસ્રધા નેકધા ચાસમત્ર । અત્ર
વિશ્વસ્મિન્ । એષ સ્પષ્ટામ્ । મયા તતમિતીદમશ્નુતે તદન્યથાસદ્યદિ
મે અસદ્બ્રિદુ ॥ ૧૯॥

મયા તતમિદં વિશ્વમિતિ । (અમુ અમુ પ્રકાર) અશ્નુત પ્રાપ્નોતિ । તત્
તદેતત્ મદુક્તમ્ । અન્યથા અસત્ અન્યથા સ્યાત્ । યદિ એવ કડપિ બ્રયુરિતિ
શેષ । તર્હિ ત અસદ્બ્રિદુ । સ્પષ્ટમ્ । ન મામશ્નોતિ જરિના કશ્ચન
ન માશ્નોતિ પરિ ગોભિરાભિઃ । કશ્ચિત્ જરિતા યજમાન મા ન અશ્નોતિ
ન પ્રાપ્નોતિ । “ન કર્મણા ન પ્રજયા ધનેન” ઇતિ શ્રુતે ।
આભિર્ગોભિવાગ્ભિ વેદરિતિ વાવત્ । ન મા પરિ અશ્નોતિ પરિપ્રાપ્નોતિ ।
પરીતિ સામસ્ત્યાર્થમ્ । તથા ચ “નાયમાત્મા પ્રવચનેન લભ્ય”
ઇતિ શ્રુતિસમાનાર્થમેતત્ । ન મેઽનાશ્વાનુત દાશ્વાનજગ્રભીત્ સર્વ
ઇન્મામુપયન્તિ વિશ્વતઃ ॥ ૨૦॥

મે મા કર્મણિ ષષ્ઠી । અનાશ્વાન્ અનશનવ્રતી ન અજગ્રભીત્ । ન
ગૃહ્ણાતિ । દાશ્વાન્ દાતા । દાનાનાશકયોરપિ “યજ્ઞેન દાનેન
તપસાનાશકેન” ઇતિ શ્રુત્યા લોકપ્રાપ્તિ હેતુત્વસ્યૈવોક્તે । ન
ચાહમેકસ્મિન્નેવ લોકે નિયત । અતો જ્ઞાનિન સર્વ એવ ઇદેવાર્થે
મા વિશ્વત વિશ્વસ્મિન્નુપયન્તિ ઉપગચ્છન્તિ । ક્વ શરારુઃ ક્વ
સૃમરઃ ક્વ નૂરણઃ સર્વમિદં ત્વત્ત્વદિતો વહામિ । શરારુ વ્યાઘ્રાદિ
સૃમર વૃકશ્ચ ક્વેતિ ક્વચિત્ પ્રત્યેક ઉરણ મેષ સર્વમિદં ત્વત્
ત્વત્ ત્વચ્છબ્દ અન્યપર્યાય । અન્યદન્યચ્ચ ઇત અનયા દિશા અનેન
સૃષ્ટિપ્રકારેણ તસિલ સર્વવિભક્તિકત્વોક્તે । વહામિ । સર્વમપીતિ
ભાવ । અતશ્ચ પુનરપ્યાહ । યન્મદિમે બિભ્યતિ તન્મ એકમ્ । યત્
મત્ મત્ત ઇમે વ્યાઘ્રાદયો બિભ્યતિ ભય પ્રાપ્નુવન્તિ । વ્યાઘ્રાદિભ્યો
ભૂયાસો બિભ્યતિ । વ્યાઘ્રાદયોઽપિ બહુભ્યો બિભ્યતિ । યસ્માચ્ચ

વ્યાઘ્રાદયો બિભ્યતિ સોઽહમેવ । તદેતદાહ । તન્મ એક તત્સર્વમપિ
મે મમ એકમેવ । એવમૈક્યે સ્વસ્ય તદપેક્ષયા વિશેષમાહ । મે તે
અક્ષન્નહમુ તાનનુક્ષમ્ ॥ ૨૧॥

તે મે મા ન અક્ષન્ ન ભક્ષયન્તિ અદેર્ઘસ્ચુપધાલોપ । ઉ ઇતિ
અનર્થકમ્ । અહમુ તાન્ અનુક્ષ ભક્ષયામિ અડાગમાભાવ છાન્દસ ।
યત્તપ્યથા બહુધા મે પુરા ચિત્ । યત્ બહુધા મદર્થ પુરા પૂર્વ
તપ્યથા તપ્તવાનસિ । ચિદિત્યનર્થકમ્ । તન્નુ ભુવેઽહ ઉરણો બોભુવે ।
તત્ તસ્માદેવ હેતો નુ નિશ્ચયેન । ભુવે ભવાય સત્તાયૈ જ્ઞાનેન
તવૈવ સત્સ્વસ્વરૂપાવાપ્તય ઇતિ યાવત્ । ઉરણો મેષ । બોભુવે અભવમ્ ।
અત પરમુપસહરન્નાહ । ઋતસ્ય પન્થામસિ હિ પ્રપન્નોઽયસે સ
મે  ઋતસ્ય સત્યસ્ય પન્થા પન્થાન પ્રપન્નોઽસિ । સ ત્વ મે મમ
એક સત્યમિત્ સત્યમેવ । ન ત્વન્યત્ કિમપિ સાંસારિક ઐહિક પ્રાપ્નુહિ ।
પુન શુદ્ધ સ્વસ્વરૂપમાહ ॥ ૨૨॥

અહં જ્યોતિરહમમૃતં વિનદ્ધિઃ । નદ્ધિ બન્ધનમ્ । તદ્રહિતમ્ ।
સ્પષ્ટમ્ । સ્વવિવર્તત્વેન વિશ્વય સ્વામદમાહ । અહં જાતં
જનિ જનિષ્યમાણમ્ । જનિ જાયમાનમ્ । સ્પષ્ટમ્ । મેધાતિથે
સ્વામદમુપદર્શયન્નાહ । અહં ત્વમહમહં ત્વમિન્નુ ત્વમહં ચક્ષ્વ ।
અહં ત્વમેવ । અહં દૃશ્યમાનશ્ચેત્ પ્રતિબિમ્બવત્ ત્વમ્ । તર્હિ કદાચિત્
મમ મિથ્યાભૂતત્વ પ્રતિબિમ્બવત્ સ્યાદત આહ । અહં ચાહમેવ । ન
પ્રતિબિમ્બવન્મિથ્યાભૂત ઇત્યર્થ । તર્હિ તવૈવ પ્રતિબિબવન્મિથ્યાભૂત
કદાચિત્ સ્યાદત આહ । ત્વમિન્નુ ત્વમહં ચક્ષ્વ ॥ ત્વમપિ ત્વમેવ
અહં ચેતિ ચ્ક્ષ્વ જાનીહિ । વિચિકિત્સીર્મ ઋજ્વા ॥ ૨૩॥

ઋજ્વા ઋજુ સામ્પ્રત ન તથાઽપક્વકપાયોઽબ્રહ્મજ્ઞશ્ચેતિ મા
વિચિકિત્સા મા સંશય કાર્ષી । કુત સન્દેહે સન્ । મા ઇત્યત્ર ઋત્યક
ઇતિ હ્રસ્વ ॥ વિશ્વશાસ્તા વિધરણો વિશ્વરૂપો રુદ્રઃ પ્રણીતી તમનઃ
પ્રજાપતિઃ । વિધરણ જગદ્ધારકત્વાત્ । પ્રણીતી જગત્પ્રણેતૃત્વાત્
અન્તર્યામિસ્વરૂપેણેતિ ભાવ । તમન શમન । યમસ્વરૂપત્વાત્ ।
સ્પષ્ટમ્ । હંસો વિશોકો અજરઃ પૂરણો ઋતીયમાનો અહમસ્મિ નામ ॥ ૨૪॥

હંસો વિવેચકત્વસામાન્યાત્ ઋતીયમાનત્વ સર્વત્ર ઘૃણાવત્ત્વેન
નિર્લેપત્વમ્ । ઋતિ સાત્રા ઘૃણાર્થ પ્રસિદ્ધ । ઋચ્છતત્રિયતેર્વા

લ્યુટ્ । અહમસ્મિ દરિતા સર્વતોમુખઃ પર્યારણઃ પરમેષ્ઠી નૃચક્ષાઃ ।
જરિતા યજમાન ઇતિ વ્યાખ્યાત પ્રાક । પયારણ વ્યાપક । નૃચક્ષા સાક્ષી ।
અહં વિઃવઙ્ઙહમસ્મિ પ્રસત્વાનહમેકો અસ્મિ યદિદ નુ કિઞ્ચ ॥ ૨૫॥

વિશ્વઙ્ વ્યાપકત્વાત્ પ્રસત્વાન્ સાક્ષી । સ્પષ્ટમ્ ।
ઇતિ બાષ્કલમન્ત્રોપનિષત્ ।

ઇતિ બાષ્કલમન્ત્રોપનિષત્ સવૃત્તિકા સમાપ્તા ।

Proofread by Sunder Hattangadi

---

*bAShkalamantropaniShat with commentary*
pdf was typeset on October 7, 2021

Please send corrections to *sanskrit@cheerful.com*